इन्यान् रामायाभ्यर्थितो ददौ” रघुः “अग्लोपित्वं स्थानिवत्त्वं चादन्तस्य प्रयोजनम् यत्र त्वेते न विद्येते तत्राग्लोपविकल्पनम्। तद्बलादन्त्यदीर्घस्य पुक् चेत्यङ्कापयत्यपि” कामधेनूक्तेः पुक्–दीर्घश्च अर्थापयते। सम्+समर्थने समर्थयते समर्थनञ्च प्रमाणेन व्यवस्थापनम्। कु पीड़ने कदादेशः कदर्थयते। अभि+आभिमुख्येन प्रार्थने अभ्यर्थनीयः। “अभ्यर्थनाभङ्गभयेन साधुः” कुमा०। प्रति+प्रतिकूलाचरणे प्रत्यर्थी। “प्रत्यर्थीभूतामपि तां समाधेः” कुमा०।

अर्थ पु० अर्थ भावकर्म्मादौ यथायथम् अच्। १अभिधेये २शब्दशक्त्या बोध्ये पदार्थे च “तददोषौ शब्दार्थावनलङ्कृती पुनः क्वापि” का०प्र० आलङ्कारिकमते स च अर्थस्त्रिविधः वाच्यो लक्ष्योव्यङ्गत्र्श्चेति भेदात्। “अर्थोवाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः। वाच्योऽर्थोऽभिधया बोध्यो लक्ष्योलक्षणया मतः। व्यङ्ग्योव्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः” सा०द०। ताश्च तत्तच्छब्दे वक्ष्यन्ते। अन्यमते “तात्पर्य्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने। तात्पर्य्यार्थं तदर्थञ्च वाक्यं तद्बोधकं परे”। इति तात्पर्य्यप्रतिपाद्योऽप्यपरः अर्थभेदः। स च अभिहितान्वयशब्दे विवृतः। ३धने। तस्य सर्व्वैरर्थनीयत्वात्तथात्वम् “अजरामरवत् प्राज्ञोविद्यामर्थांश्च चिन्तयेत्” ‘अर्थस्योपार्ज्जने क्लेशस्ततोऽपि परिरक्षणे” नीति०। सचार्थस्त्रिविधः शुक्लः शवलः कृष्णश्चेति भेदात् यथा “अथ गृहाश्रमिणस्त्रिविधोऽर्थोभवति। शुक्लः शवलोऽसितश्चेति। शुक्लेनार्थेन यदैहिकं करोति तद्देवमासादयति। यच्छबलेन तन्मानुष्यम्, यत्कृष्णेन तत्तिर्य्यक्त्वम्॥ स्ववृत्त्युपार्जितं सर्व्वं सर्व्वेषां शुक्लम्। अनन्तरवृत्त्युपात्तं शवलम्। अन्तरितवृत्त्युपात्तञ्च कृष्णम्। क्रमागतं प्रीतिदायम् प्राप्तञ्च सह भार्य्यया। अविशेषेण सर्व्वेषां धनं शुक्लं प्रकीर्त्तितम्॥ उत्कोचशुल्कसंप्राप्तमविक्रेयस्य विक्रये। कृतोपकारादाप्तञ्च शवलं समुदाहृतम्॥ पार्श्विकद्यूतचौर्य्याप्तं प्रतिरूपकसाहसैः। व्याजेनोपार्जितं यच्च तत् कृष्णं समुदाहृतम्॥ यथाविधेन द्रव्येण यत्किञ्चित् कुरुते नरः। तथाविधमवाप्नोति स फलं प्रेत्य चेह च” विष्णु०स्मृ०॥ ४प्रयोजने इष्टे। प्रयोजनञ्च इच्छाविषयः। तच्च गौणमुख्यभेदेन द्विविधम् यत्र अन्येच्छानधीनेच्छा जायते तत् मुख्यं यथा सुखं दुःखाभावश्च तयोरिच्छाया अन्येच्छानधीनत्वात्। साक्षात् परम्परया वा तत्साधनं तु गौणं तत्र सुखदुःखाभावेच्छयैव इच्छोदयात् गौणत्वम्। प्रयोजनञ्च यद्यपि नानाविधम् तथापि शास्त्रकारैः प्राधान्येन धर्म्मार्थकाममोक्षरूपाणि चत्वार्य्येवाङ्गीकृतानि तत्रैव सर्व्वप्रयोजनानामन्तर्भावात्। तएव चत्वारः पुरुषार्थाः पुरुषेरेष्यमाणत्वात्। सांख्यास्तु सर्गापवर्गात्मकं द्विविधं पुरुषार्थमाहुःपुरुषस्य प्रयोजनमुद्दिश्य प्रकृतेः प्रवर्त्तनात्। एवं चतुर्विधे द्विविधे वा पुरुषार्थे मतभेदेन स्थिते तेषु मध्ये मोक्षएव परमपुरुषार्थः “अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः” सा०सू०। “इह खलु धर्म्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्षएव परमपुरुषार्थः” वे०प०। दुःखात्यन्तनिवृत्तिरूपमुख्यप्रयोजनस्य अन्येच्छानधीनेच्छाविषयत्वात् प्राधान्यम्। धर्म्मार्थकामास्तु तत्साधनानि तत्रापि धर्म्मोऽर्थसाधनम् अर्थः कामस्य साधनमित्यवान्तरभेदः “इक्ष्वाकूणां दुरापेऽर्थे तदधीनाहि सिद्धयः” रघुः। “ज्ञातार्थोज्ञातसम्बन्धः श्रोतुं श्रोता प्रवर्त्तते” इत्यत्रार्थपदेनाभिधेयप्रयोजनयोर्ग्रहणम् ‘कस्यार्थकामौ वद पीड़यामि” ‘अप्यर्थकामौ तस्यास्तां धर्म्म एव मनीषिणः” रघुः। ५निमित्ते “अतोऽर्थान्न प्रमाद्यन्ति प्रमदासु विपश्चितः” मनुः अर्थात् हेतोः कुल्लू० “अर्थोऽयमर्थान्तरलभ्य एव” कुमा० “अर्थान्तरं कारणान्तरमिति” मल्लि०। निमित्तञ्च कारणमुद्देश्यञ्च तत्र निमित्तार्थेन “अर्थेन तु नित्यसमासो विशेष्यनिघ्नता चेति” वार्त्तिकोक्तेः नित्यश्चतुर्थीसमासः। द्विजार्थं पयः। द्विजार्था यवागूः। यूपार्थं दारु। भाष्यकृता तु यूपार्थं दारु इत्यादौ बहुव्रीहिरपि साधुः स्वरे विशेष इत्युक्तम् “अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः” गीता “मदर्थमपि कर्म्माणि कुर्व्वन्नाप्नोति किल्विषम्” गीता “मदर्थसन्देशमृणालमन्थरः” नैष०। “परलोकसहायार्थं सर्व्वभूतान्यपीड़यन्” “तस्माद्धर्म्मं सहायार्थं” इति च मनुः। कर्म्मणि–अच्। ६विषये शब्दादौ। “इन्द्रियाणीन्द्रियार्थेभ्यः गीता” “इन्द्रियेभ्यः पराह्यर्था ह्यर्थेभ्यश्च परं मनः” क०उ०। ७ ज्ञेयवस्तुनि “इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षम्” गौ० सू०। अत्रार्थः घटादिवस्तुमात्रम्। राज्ञ उपाये ८ तन्त्रावापादौ अर्थचिन्ताशब्दे उदा०। ९वस्तुस्वभावे यथार्थम्। १०निवर्त्तनीये मशकार्थो धूमः। ज्योतिषोक्ते ११लग्नावधिद्वितीयभवने १२प्रकारे। भावे अच् १३अभिलाषे १४प्रार्थने च कर्म्मणि यत् १५अर्थनीये विष्णौ पु० “अर्थोऽनर्थो महाकोपः” वि० स० “सुखरूपतया सर्व्वैरर्थ्यत इत्यर्थः। भा० १६फले। अर्थाय साधुः अर्था-